RAMSADAY COLLEGE

Department of Sanskrit

Semester : II (Honours)

Paper : CC-4

Topic : Gita ( Section - C )

Prepared by : Paramita Banik

Content Type : *pdf*

Scanned by CamScanner

Gītā (Section-C) [Short Note]

मत्कर्मकृत् ⇒ पदोऽयं श्रीमद्भगवद्गीतायाः विश्वरूपदर्शनयोग इति एकादशाध्याये समुपलभ्यते।

विश्वरूपप्रदर्शनपूर्वकं सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थः निःश्रेयसार्थोऽनुष्ठेयत्वेन उपदेशप्रदानकाले अर्जुनं प्रति भगवता श्रीकृष्णेन उक्तं मत्कर्मकृत् इति पदम्।

मदर्थं कर्म मत्कर्म, तत् करोति य सः मत्कर्मकृत्। अर्थात् कर्तृत्वाभिमानत्यागपूर्वकं भगवतः प्रीत्यर्थं भृत्यबोधेन सर्वकर्माणि विश्वरूपे ईश्वरे संन्यस्य कार्यानुष्ठानं करणीयम्। भक्तिशास्त्रे श्रवण-कीर्तन-स्मरणादि-नवविधानि भक्तिसाधनानि उल्लिखितानि। एतानि भक्तिसाधनानि यः आचरति स एव भगवत्कर्मपरायणः। अपि च केचिदाहुः — भगवत्मन्दिरनिर्माण-तद्विमार्जन-पुष्पवाटी-तुलसी-काननादिसंस्कार-तत्सेचनादि-भगवत्पूजन-कार्यं मत्कर्म इति पदेन निर्दिश्यते। एवं भगवतः पूजन-भजनादि-कार्यं यः करोति स एव अत्र मत्कर्मकृदिति पदेन अलंक्रियते। वस्तुतः इहलोके भृत्यः स्वामिकर्म एव करोति, न तु आत्मनः परमा गतिरिति स्वामिनं प्रतिपद्यते, परन्तु 'मत्कर्मकृत्' ईश्वरमेव परमां गतिं प्रतिपद्यते इति सः मत्परमः अपि भवति यतः परा गतिर्यस्य सोऽयं मत्परमः अर्थात् भगवत्परमः इति शम्।

Scanned by CamScanner